# gītā dhyānam

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम्।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥
pārthāya pratibodhitāṃ bhagavatā nārāyaṇena svayaṃ vyāsena grathitāṃ purāṇa-muninā madhye mahābhāratam ।
advaitāmṛta-varṣiṇīṃ bhagavatīm aṣṭādaśādhyāyinīṃ amba tvām anusandadhāmi bhagavad-gīte bhava-dveṣiṇīm ॥1॥

नमोऽस्तुते व्यास विशालबुद्धेफुल्लारविन्दायतपत्रनेत्र । येन त्वया भारततैलपूर्णः प्रज्विलतो ज्ञानमयः प्रदीपः ॥
namo'stu te vyāsa viśāla-buddhe phullāravindāyatapatra-netra । yena tvayā bhārata-taila-pūrṇaḥ prajvālito jñānamayaḥ pradīpaḥ ॥2॥

प्रपन्नपरिजाताय तोत्रवेत्रैकपाणये । ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
prapanna-pārijātāya totra-vetraika-pāṇaye I jñāna-mudrāya kṛṣṇāya gītāmṛta-duhe namaḥ II3II

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः । पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥
sarvopaniṣado gāvo dogdhā gopāla-nandanaḥ I pārtho vatsaḥ sudhīr bhoktā dugdhaṃ gītāmṛtaṃ mahat II4II

वसुदेवसुतं देवं कंसचाणूरमर्दनम्। देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्॥
vasudeva-sutaṃ devaṃ kaḿsa-cāṇūra-mardanam । devakī-paramānandaṃ kṛṣṇaṃ vande jagad-gurum ॥5॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला शल्यग्राहवती कृपेण वहिनी कर्णेन वेलाकुला ।
अश्वत्तामविकर्णघोरमकरा दुर्योधनावर्तिनी सोत्तीर्णा खलुपाण्डवार्णवनदी कैवर्तकः केश्वः ॥
bhīṣma-droṇa-taṭā jayadratha-jalā gāndhāra-nīlotpalā śalya-grāhavatī kṛpeṇa vahanī karṇena velākulā ।
aśvattāma-vikarṇa-ghora-makarā duryodhanāvartinī sottīrṇā khalu pāṇḍavairaṇa-nadī kaivartakaḥ keśavaḥ ॥6॥

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटं नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम्।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपङ्कजं कलिमलप्रध्वंसनं श्रेयसे ॥

pārāśarya-vacaḥ sarojam amalaṃ gītārtha-gandhotkaṭaṃ nānākhyānaka-kesaraṃ hari-kathā-sambodhanābodhitam ।
loke sajjana-ṣaṭpadair-aharahaḥ pepīyamānaṃ mudā bhūyād bhārata-paṅkajaṃ kalimala-pradhvaṃsanaṃ śreyase ॥ 7॥

मूकं करोति वाचालं पङ्गुं लङ्घायते गिरिम्। यत्कृपा तमहं वन्दे परमानन्दमाधवम्॥

mūkaṃ karoti vācālaṃ paṅguṃ laṅghāyate girim । yat-kṛpā tam ahaṃ vande paramānanda-mādhavam ॥8॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वे दैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनःयस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

yaṃ brahmā varuṇendra-rudra-marutaḥ stunvanti divyaiḥ stavair vedaiḥ sāṅga-pada-kramopaniṣadair gāyanti yaṃ sāma-gāḥ ।
dhyānāvasthita-tad-gatena manasā paśyanti yaṃ yoginaḥ yasyāntaṃ na viduḥ surāsura-gaṇā devāya tasmai namaḥ ॥ 9॥